कालेच सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्र च सकृत् सकृत्" । अङ्गिराः । "चण्डलादीन् जपे होमे दृष्ट्वाचम्य विशुद्ध्यति । श्वादीन् दृष्ट्वापि वाचामेत् कर्णं वा दक्षिणं स्पृशेत् । जानुनोरधस्तात्खादिस्पर्शे आचमनमन्यत्र स्नानविधानात् । उदकाभावेऽसामर्थ्ये वा दक्षिणश्रवणस्पर्शः । अनेनैवाभिप्रायेण वृहस्पतिः । "पितृमन्त्रोच्चारे रौद्रे आमालम्भेऽधमेक्षणे । अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसम्भवे । मार्जारमूषिकस्पर्शे प्रहासेऽनृतभाषणे । निमित्तेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत्" । तथा "आर्द्रं तृणं गोमयं वा भूमिं वा संस्पृशेद्द्विजः" । सांख्यायनः । क्षुते निष्ठीवने इत्यादि प्रागुक्तम् । आचारसागरे । अपःपीत्वौषधं जग्ध्वा कृत्वा ताम्बूलचर्व्वणम् । सौगन्धिकानि सर्वाणि नचाचामेद्विचक्षणः । अपोजग्ध्वेति अमृतोपधानमसीत्यादिभिर्म्मन्त्रैरपोजग्ध्वानन्तरं नित्यं नाचामेदित्यर्थः । वौधायनः । "पादक्षालनशेषेण नाचामेद्वारिणा द्विजः । शुभाभावे पिबेत् किञ्चित्क्षिप्त्वा भूमौ जलं स्पृशेत्" । आपस्तम्बः । "सन्ध्यार्थे भोजनार्थे वा पित्रर्थे वा तथैव च । शूद्राहृतेन नाचामेत् जपेज्याहवनेषु च" । यमः । तावन्नोपस्पृशेत् विप्रोयावद्वामेन संस्पृशेत् । उदके चोदकस्थस्तु स्थलस्थस्तु स्थले शुचिः । पादौ स्थाप्योभयत्रापि आचान्तोभयतः शुचिः" । जले स्थले चैकैकं पादं कृत्वाचान्त उभयत्र जलकर्म्मणि स्थलकर्म्मणि च शुद्धो भवतीत्यर्थः । "अकृत्वा पादयोः शौचं तिष्ठन्मुक्तशिखोऽपि वा । विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्" । तिष्ठन्निति स्थलविषयम् । विष्णुना तिष्ठतोपि जलेऽभ्यनुज्ञानात् । "जान्वोरूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोपि समाचान्तो न शुद्ध्यति" । अधस्तान्निषेधाज्जानुदघ्नेऽप्यविरुद्धम् । तथा च स्मर्य्यते । "जानुमात्रे जले तिष्ठन्निति" अत्राचान्तः शुचिरिति वाक्यशेषः । तथा "सोपानत्कोनचोष्णीषी पर्य्यङ्कशययानगः । दुर्द्दशे प्रपतंश्चैव नाचमन् शुद्धिमाप्नुयात् । नरगोखरयानाश्वहस्त्यधीरोहकस्तथा । आचान्तः कर्म्मशुद्धः स्यात्ताम्बूलौषधजग्धिकृत् । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन । न पादुकास्थो न त्वरितो नचायज्ञोपवीतवान् । स्पृशन्ति विन्दवः पादौ जङ्घे चामतः परान् । भौमिकैस्ते समाज्ञेया नचैवाप्रयतो भवेत् । परेषामाचमनीयोदके दीयमाने ये विन्दवः पादयोः पतन्ति ते नाऽशुद्धात्यर्थः" । "न तिष्ठन्नुद्धृतोदकेनाचामेन्न शूद्राशुच्येकपाण्यावर्ज्जितेन" गौ० । स्पष्टः क्रमः काशीखण्डे उक्तः । "प्रागास्य उदगास्यो वा सूपविष्टः शुचौ भुवि । उपस्पृशेद्विहीनायां तुषाङ्गारास्थिभस्मभिः । अनुष्णाभिरफेनाभिरद्भिर्जुष्टाभिरत्वरः । ब्राह्मणोब्राह्मतीर्थेन दृष्टिपूताभिराचमेत् । कण्ठगाभिर्नृपः शुध्येत्तालुगाभिस्तथोरुजः । स्त्रीशूद्रावास्यसंस्पर्शमात्रेणापि विशुध्यतः । समस्ताङ्गुलिनोद्धृत्य पाणिना दक्षिणेन तु । त्यक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं विदुः । शिरः प्रावृत्य कण्ठं वा जले मुक्तशिखोऽपि वा । अक्षालितपदद्वन्द्व आचान्तोऽप्यशुचिर्मतः । त्रिःपीत्वाम्बु विशुद्ध्यर्थं ततः खानि विशोधयेत् । अङ्गुष्ठमूलदेशेन द्विर्द्विरोष्ठाधरौ स्पृशेत् । अङ्गुलीभिस्त्रिभिः पश्चात् पुनरास्यं स्पृशेत् सुधीः । तर्ज्जन्यङ्गुष्ठकोष्ठौ च घ्राणरन्ध्रे पुनः पुनः । अङ्गुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः । कनिष्ठाङ्गुष्ठयोगेन नाभिरन्ध्रमुपस्पृशेत् । स्पृष्ट्वा तलेन हृदयं समस्ताभिः शिरः स्पृशेत् । अङ्गुल्यग्रैस्तथा स्कन्धौ साम्बु सर्व्वत्र संस्पृशेत् । आचान्तः पुनराचामेत् क्षुते रथ्योपसर्पणे । स्नात्वा भुक्त्वा पयः पीत्वा प्रारम्भे शुभकर्म्मणाम् । सुप्त्वा वासः परीधाय तथा दृष्ट्वाप्यमङ्गलम् । प्रमादादशुचिं स्पृष्ट्वा द्विराचान्तः शुचिर्भवेत्" । सन्ध्याङ्गाचमने शाखिभेदे मन्त्रविशेषोऽपि स्मर्य्यते । "सायमग्निश्च मेत्युक्त्वा प्रातः सूर्य्येत्यपः पिबेत् । आपः पुनन्तु मध्याह्ने ततश्चाचमनं चरेत्" एभिराचमनं चरेदिति शौनकीये पाठः । मैत्रायणीय गृह्य परि० । "प्रातः सूर्य्यश्चमेत्युक्त्वा सायमग्निश्च मेति च । आपः पुनन्तु मध्याह्ने कुर्य्यादाचमनं ततः" । "ततः प्राणायामानन्तरमिति" आ०त० रघु० "प्राणस्यायमनं कृत्वा आचामेत् प्रयतोऽपि सन् । अन्तरं छिद्यते यस्मात्तस्मादाचमनं स्मृतम्" योगि०या० । मदनपारिजाते । "सन्ध्याचमने बौधायनः अथातः सन्ध्योपासनविधिं व्याख्यास्यामः तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादः अप आचम्याग्निश्च मा मन्युश्चेति सायमपः पीत्वा, सूर्य्यश्च मामन्युश्चेति प्रातरपः पीत्वेति" अग्निश्च सूर्य्यश्चेति यजुर्वेदिनामिमौ मन्त्रौ च्छन्दोगानां तु सन्ध्याचमने गौतमोक्तौ मन्त्रौ द्रष्टव्यौ "अहश्च मादित्यश्च पुनात्विति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमिति" "एतौ च मन्त्रौ प्रजापतिदृष्टौ लिङ्गोक्तदैवतौ चेति" अनयोश्च मन्त्रयोः सामविदिविषयकत्वेन तत्रोक्तावपि तयोः सम्यगज्ञानात् "यजुः सर्व्वत्र पीयते" इत्युक्तेश्च यजुर्वेदोक्ता-